# Shivabhakti Kalpalatika Stotram

# શિવભક્તિકલ્પલતિકાસ્તોત્રમ્

## Document Information

Text title : shivabhaktikalpalatikAstotram

File name : shivabhaktikalpalatikAstotram.itx

Category : shiva, shrIdhara-venkaTesha

Location : doc_shiva

Author : abhinavanRisiMhabhAratIsvAmi

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 28, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શિવભક્તિકલ્પલતિકાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

શ્રીકાન્તપદ્મજમુખૈર્હૃદિ ચિન્તનીયં
    શ્રીમત્ત્વ શઙ્કર ભગવચ્ચરણારવિન્દમ્ ।
ક્વાહં તદેતદુપસેવિતુમીહમાનો
    હા હન્ત કસ્ય ન ભવામ્યુપહાસપાત્રમ્ ॥ ૧॥

અદ્રાક્ષમઙ્ઘ્રિકમલં ન તવેતિ યન્મે
    દુઃખં યદપ્યનવમૃશ્ય દુરાત્મતાં સ્વામ્ ।
પાદામ્બુજં તવ દિદૃક્ષ ઇતીદૃગાગઃ
    પાતોઽનલે પ્રતિકૃતિર્ગિરિશૈતયોર્મે ॥ ૨॥

દૌરાત્મ્યતો મમ ભવત્પદદર્શનેચ્છા
    મન્તુસ્તથાપિ તવ સા ભજનાત્મિકેતિ ।
સ્યાદીશિતુર્મયિ દયૈવ દયામકાર્ષી-
    રશ્માદિભિઃ પ્રહૃતવત્સુ ન કિં બિભો ત્વમ્ ॥ ૩॥

દુઃખાનલોદરનિપાતનધૂર્વદેષ્વે-
    ષ્વર્થાઙ્ગનાસુતમુખેષ્વનુરાગ આગાઃ ।
સ્યાત્તે રુષે તવ દયાલુતયા ત્વદાન-
    ત્યાદ્યૈર્વિભો તદવધૂય બિભર્ષિ ચાસ્માન્ ॥ ૪॥

ઈશાન રક્ષિતુમિમાન્યદપેક્ષસે ત્વં
    નત્યાદિકં તદપનેતુમતિપ્રસઙ્ગમ્ ।
કિં હીયતે તદનુપાધિકૃપાલુતા તે
    સંવિત્સુખસ્ય ન હિ તે પ્રિયમપ્રિયં વા ॥ ૫॥

અપ્યાહર પ્રહર સંહર વાગ્વદસ્ય
    ત્રાતાસ્યુપાત્તમમુના મમ નામ હીતિ ।

એવં વિભો તનુભૃતામવનેઽત્યુપાયા-
ન્વેષી કથં પરમકારુણિકોઽસિ ન ત્વમ્ ॥ ૬॥

ત્રાતા દયાજલનિધિઃ સ્મૃતિમાત્રલભ્યઃ
ક્ષન્તાગસામિતિ ભવદ્યશસા હૃતાત્મા ।
સ્વામસ્મરન્બત મલીમસતામલજ્જો
ભક્તિં ભવત્યભિલષામિ ધિગસ્તુ યન્મામ્ ॥ ૭॥

શર્માપ્તિરાર્તિવિહતિશ્ચ ભવત્પ્રસાદં
શમ્ભોર્વિના ન હિ નૃણાં સ ચ નાન્તરા યામ્ ।
યસ્યાં વિધિઃ શ્વભુગપિ ક્ષમતે સમં તાં
ત્વદ્ભક્તિમિચ્છતુ ન કઃ સ્વવિનાશભીરુઃ ॥ ૮॥

ભક્તિર્વિભાત્યયિ મહત્યપરં તુ ફલ્ગ્વિ-
ત્યેવં ગ્રહો નનુ ભવત્કૃપયૈવ લભ્યઃ ।
લબ્ધસ્ત્વસૌ ફલમમુષ્ય લભે ન કિં વા
તાં હન્ત તે તદયશો મમ હૃદ્રુજા ચ ॥ ૯॥

ત્વદ્ભક્ત્યસમ્ભવશુચં પ્રતિકારશૂન્યા-
મન્તર્વહન્નિખિલમીશ સુખં ચ દુઃખમ્ ।
ઉદ્બન્ધલગ્ન ઇવ દુઃસ્વતયૈવ મન્યે
સન્તાન્યતીતિ મયિ હન્ત કદા દયેથાઃ ॥ ૧૦॥

ભક્તિં ભવત્યવિહિતાં વહતસ્તુ તદ્વિ-
શેષોપલમ્ભવિરહાહિતમસ્તુ દુઃખમ્ ।
તસ્યાઃ પ્રતીપતતિભિર્હતિજં કથં વા
દુઃખં સહે મયિ કદેશ કૃપા ભવેત્તે ॥ ૧૧॥

લગ્નઃ કૃતાન્તવદનેઽસ્મિ લભે ચ નાદ્યા-
પ્યચ્છાં રતિં ત્વયિ શિવેત્યવસીદતો મે ।
ત્વદ્વિસ્મૃતિં  કુવિષયાભિરતિપ્રચારૈ-
સ્તન્વન્ હિ માં હસપદં તનુષે બ્રુવે કિમ્ ॥ ૧૨॥

બદ્ધસ્પૃહં રુચિરકાઞ્ચનભૂષણાદૌ
બાલં ફલાદિભિરિવ ત્વયિ ભક્તિયોગે ।
આશાભરાકુલમહો કરુણાનિધે મા-
મર્થાન્તરૈર્હૃતધિયં કુરુષે કિમેવમ્ ॥ ૧૩॥

તિક્તગ્રહોઽપિ મધુરં મધુરગ્રહોઽપિ
    તિક્તં યથા ભુજગદષ્ટતનોસ્તથાહમ્ ।
ત્વય્યસ્તરક્તિરિતરત્ર તુ ગાઢમગ્નઃ
    શોચ્યોઽશ્મનોઽપિ હિ ભવામિ કિમન્યદીશ ॥ ૧૪॥

ત્વત્સંસ્મૃતિત્વદભિધાનસમીરણાદિ-
    સમ્ભાવનાસ્પદમમી મમ સન્તુ શોકાઃ ।
મા સન્તુ ચ ત્વદનુષક્તિમુષઃ પ્રહર્ષા
    મા ત્વત્પુરઃસ્થિતિપુષેશ દૃશાનુપશ્ય ॥ ૧૫॥

સમ્પાતનં નનુ સુખેષુ નિપાતનં વા
    દુઃખેષ્વથાન્યદપિ વા ભવદેકતાનમ્ ।
યત્કલ્પયેર્નનુ ધિયા શિવ તદ્વિધેહિ
    નાવૈમ્યહં મમ હિતં શરણં ગતસ્ત્વામ્ ॥ ૧૬॥

દુઃખં પ્રદિત્સુરયિ મે યદિ ન પ્રદદ્યા
    દુઃખાપહં પુરહર ત્વયિ ભક્તિયોગમ્ ।
ત્વદ્ભક્ત્યલાભપરિચિન્તનસમ્ભવં મે
    દુઃખં પ્રદેહિ તવ કઃ પુનરત્ર ભારઃ ॥ ૧૭॥

ભક્ત્યા ત્વયીશ કતિ નાશ્રુપરીતદૃષ્ટ્યા
    સઞ્જાતગદ્ગદગિરોત્પુલકાઙ્ગયષ્ટ્યા ।
ધન્યાઃ પુનન્તિ ભુવનં મમ સા ન હીતિ
    દુઃખેઽપિ કા નુ તવ દુર્લભતા વિધિત્સા ॥ ૧૮॥

ત્વદ્ભક્તિરેવ તદનવાપ્તિશુગપ્યુદારા
    શ્રીઃ સા ચ તાવકજનાશ્રયણે ચ લભ્યા ।
ઉલ્લઙ્ઘ્ય તાવકજનાન્ હિ તદર્થનાગ-
    સ્ત્વય્યાઃ સહસ્વ તદિદં ભગવન્નમસ્તે ॥ ૧૯॥

સેવા ત્વદાશ્રયવતાં પ્રણયશ્ચ તેષુ
    સિધ્યેદ્દૃઢો મમ યથાઽઽશુ તથા દયાર્દ્રામ્ ।
દૃષ્ટિં તવાર્પય મયીશ દયામ્બુરાશે
    મૈવં વિભો વિમુખતા મયિ દીનબન્ધો ॥ ૨૦॥

ગૌરીસખં હિમકરપ્રભમમ્બુદાભં

શ્રીજાનિ વા શિવવપુસ્તવ તજ્જુષો યે ।
તે ત્વાં શ્રિતા વહસિ મૂર્ધ્નિ તદઙ્ઘ્રિરેણું
તત્સેવનં મમ કથં નુ દયાં વિના તે ॥ ૨૧॥

ત્વદ્ભક્તિકલ્પલતિકાં કૃપયાર્પયેશ
મચ્ચિત્તસીમ્નિ ભવદીયકથાસુધાભિઃ ।
તાં વર્ધય ત્વદનુરાગફલાઢ્યમૌલિં
તન્મૂલ એવ ખલુ મુક્તિફલં ચકાસ્તિ ॥ ૨૨॥

નિઃસ્વો ધનાગમ ઇવ ત્વદુપાશ્રિતાનાં
સન્દર્શને પ્રમુદિતસ્ત્વયિ સાન્દ્રહાર્દઃ ।
આલોકયન્ જગદશેષમિદં ભવન્તં
કાર્યસ્ત્વયેશ કૃપયાહમપાસ્તખેદઃ ॥ ૨૩॥

યો ભક્તિકલ્પલતિકાભિધમિન્દુમૌલે-
રેવં સ્તવં પઠતિ તસ્ય તદૈવ દેવઃ ।
તુષ્ટઃ સ્વભક્તિમખિલેષ્ટદુહં દદાતિ
યાં પ્રાપ્ય નારદમુખૈરુપયાતિ સામ્યમ્ ॥ ૨૪॥

ઇતિ શ્રી શ્રીધરવેઙ્કટેશાર્ય કૃતૌ
શિવભક્તિકલ્પલતિકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Shivabhakti Kalpalatika Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*